A

परीक्षा केन्द्र की मुहर लगायें
Affix stamp of examination centre

**Booklet Series** **A**

**Code : TG-03**

Question Booklet No.
प्रश्न पुस्तिका संख्या
11021197

# संस्कृत
# SANSKRIT

अनुक्रमांक (अंकों में)
Roll No. (in figures) 
(केवल अंग्रेजी में/Only in English)

OMR क्रम संख्या (अंकों में)
OMR Serial No. (in figures) 
(केवल अंग्रेजी में/Only in English)

OMR क्रम संख्या (शब्दों में)
OMR Serial No. (in words) ................................................................................................

................................................................................................

केन्द्र का नाम/Name of the Centre ................................................................................................

समय : 2 घंटे    Time : 2 Hours

पूर्णांक : 500    M.M. : 500

कक्ष–निरीक्षक का हस्ताक्षर/Signature of the Invigilator

## आवश्यक निर्देश

1. अभ्यर्थी अपना अनुक्रमांक केवल आवरण पृष्ठ तथा प्रश्न–पुस्तिका के साथ दिए गए OMR उत्तर–पत्रक के निर्दिष्ट स्थान पर लिखेंगे, अन्यत्र कहीं नहीं ।
2. प्रश्न–पुस्तिका मिलने के उपरान्त अभ्यर्थी को तुरन्त जाँच कर सुनिश्चित कर लेना चाहिए कि पुस्तिका में पूरे पृष्ठ हैं तथा कोई प्रश्न छूट तो नहीं गया है । यदि कोई विसंगति है, तो प्रश्न–पुस्तिका मिलने के 10 मिनट के भीतर ही कक्ष–निरीक्षक को सूचित करना चाहिए तथा त्रुटिरहित दूसरी पुस्तिका प्राप्त कर लेनी चाहिए ।

## IMPORTANT INSTRUCTIONS

1. The candidate will write his/her Roll No. only at the place provided for i.e. on the cover page and on OMR answer sheet given and nowhere else.
2. Immediately on the receipt of the question booklet, the candidate will check up and ensure that it contains all the pages and that no question is missing. If there is any discrepancy, it should be reported by the candidate to the invigilator within 10 minutes of issue of this question booklet and a fresh booklet without any discrepancy be obtained.

*

DO NOT WRITE HERE



*

# रफ कार्य के लिए जगह
# Space for Rough Work

*



SEAL

# संस्कृत
# SANSKRIT

1. अच्प्रत्याहारेण न बोधितो भवति
(A) च्
(B) अ
(C) ऋ
(D) ए

2. ''कोऽन्यो हुतवहाद् दग्धुं प्रभवति ?'' इति का कथयति ?
(A) अनसूया
(B) शकुन्तला
(C) प्रियंवदा
(D) गौतमी

3. मेघदूतस्य शैल्यां त्रयोदश–शताब्द्यां वेदान्तदेशिककृतरामकथाविषयकदूतकाव्यस्य नाम
(A) हनुमतदूतम्
(B) कपिदूतम्
(C) हंससन्देशम्
(D) भ्रमरदूतम्

4. 'शिवराजविजय:' रचना अस्ति
(A) अम्बिकादत्तव्यासस्य
(B) पण्डितराजजगन्नाथस्य
(C) दण्डिन:
(D) बाणभट्टस्य

5. 'विचिन्तयन्ती यमनन्यमानसा' इत्यत्र 'अनन्यमानसा' पदे समासोऽस्ति
(A) तत्पुरुष:
(B) कर्मधारय:
(C) बहुव्रीहि:
(D) अव्ययीभाव:

6. अहंकारदाहज्वरमूर्च्छिता का भवति ?
(A) राजप्रकृति:
(B) राजनीति:
(C) राजमहिषी
(D) राजकन्या

7. 'निरत्ययं साम न दानवर्जितम्' इत्यस्मिन् श्लोकांशे 'निरत्ययम्' इति पदे समासोऽस्ति
(A) अव्ययीभाव:
(B) तत्पुरुष:
(C) कर्मधारय:
(D) बहुव्रीहि:

8. पा (पिब्) धातो: लङ् – प्रथमपुरुषैकवचनस्य रूपमस्ति
(A) पिबति
(B) अपिबत्
(C) पिबेत्
(D) पास्यति

9. कविशब्दस्य तृतीयाविभक्ते: रूपं नास्ति
(A) कविना
(B) कविभ्याम्
(C) कविभि:
(D) कविभ्य:

10. शुकनासेन क उपदिष्ट: ?
(A) तारापीड:
(B) चन्द्रापीड:
(C) जाबालि:
(D) पुण्डरीक:

11. अधोलिखिताया: सूक्ते: स्रोत: किम् ?
'आपन्नार्तिप्रशमनफला: सम्पदो ह्युत्तमानाम्।'
(A) नीतिशतकम्
(B) शिवराजविजय:
(C) मेघदूतम्
(D) किरातार्जुनीयम्

12. 'पा' धातोः विधिलिङ्लकारे मध्यमपुरुषैकवचने' किं रूपं भवति ?

(A) पेयात्

(B) पेयाः

(C) पिबेयम्

(D) पिबेः

13. समासं करोतु – कृष्णं श्रितः

(A) कृष्णाश्रितः

(B) कृष्णश्रितः

(C) कृष्णेश्रितः

(D) कृष्णीश्रितः

14. किरातार्जुनीयस्य प्रथम सर्गस्य अन्तिमं पद्यं केन छन्दसा निबद्धोऽस्ति ?

(A) वंशस्थ–छन्दसा

(B) उपजाति–छन्दसा

(C) आर्या–छन्दसा

(D) मालिनी–छन्दसा

15. उपमानपूर्वपदकर्मधारयस्य उदाहरणमस्ति

(A) घनश्यामः

(B) पुरुषव्याघ्रः

(C) कृष्णसर्पः

(D) चराचरम्

16. 'पतिः' इति शब्दस्य तृतीया विभक्तौ एकवचने रूपमस्ति

(A) पत्या (B) पतिना

(C) पत्येन (D) पतीना

17. महाकविबाणभट्टकृतकादम्बर्यन्तर्गतः ग्रन्थः

(A) वासवदत्ता

(B) शुकनासोपदेशः

(C) ऋग्वेदभाष्यभूमिका

(D) वेदान्तसारः

18. 'भू' धातोः लङ् लकारस्य मध्यमपुरुषस्य बहुवचने रूपम भवति

(A) अभवत्

(B) अभवत

(C) अभवन्

(D) अभवम्

19. 'प्रत्यर्पितन्यास इवान्तरात्मा' इत्यस्मिन् पद्यांशे कोऽलङ्कारः ?

(A) उपमा (B) रूपकम्

(C) उत्प्रेक्षा (D) दीपकम्

20. किरातार्जुनीये कस्य रसस्य प्रधानता ?

(A) श्रृंगाररसस्य (B) हास्यरसस्य

(C) वीररसस्य (D) अद्भुतरसस्य

21. 'विग्रहवत्यपि अप्रत्यक्षदर्शना' का ?

(A) तृष्णा (B) लक्ष्मीः

(C) इन्द्रियरागः (D) लोलुपता

22. 'स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता' इत्यनेन संकेतितोऽस्ति

(A) वाल्मीकिः (B) व्यासः

(C) अगस्त्यः (D) वसिष्ठः

23. लब्धापि का दु:खेन संरक्ष्यते ?

(A) विद्या (B) शक्ति:

(C) स्मृति: (D) लक्ष्मी:

24. 'न विव्यथे तस्य मनो न हि प्रियं, प्रवक्तुमिच्छन्ति मृषा हितैषिण:।' इति श्लोकांशस्य 'हितैषिण:' इति पदे विभक्तिवचने स्त:

(A) प्रथमा, बहुवचनम्

(B) द्वितीया, बहुवचनम्

(C) पञ्चमी, एकवचनम्

(D) षष्ठी, एकवचनम्

25. पितृशब्दस्य रूपं नास्ति

(A) पितृणा (B) पित्रे

(C) पितु: (D) पित्रो:

26. 'कामकरिण: कदलिका' का ?

(A) लक्ष्मी: (B) तृष्णा

(C) माया (D) वासना

27. 'परभृतविरुतं कलं यथा' इत्यत्र 'परभृत' शब्दस्य कोऽर्थ: ?

(A) चातक: (B) काक:

(C) हंस: (D) कोकिल:

28. सुयोधन: जगतीं केन जेतुं समीहते ?

(A) युद्धेन

(B) छलेन

(C) नयेन

(D) विनयेन

29. यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं क: क्षम: ।। सूक्तिरियं कस्य ग्रन्थस्य ?

(A) किरातार्जुनीयस्य

(B) नीतिशतकस्य

(C) उत्तररामचरितस्य

(D) शिवराजविजयस्य

30. कर्मसंज्ञाविधायकं सूत्रं नास्ति

(A) अभिनिविशश्च

(B) तथायुक्तं चानीप्सितम्

(C) अकथितञ्च

(D) सहयुक्तेऽप्रधानम्

31. पञ्चत्रिंशदधिकद्विशतम् बोधयति

(A) 253 (B) 235

(C) 532 (D) 335

32. शुकनासोपदेशस्य वचनमत्र

(A) तृष्णा–विष–मूर्च्छिता: कनकमयमिव सर्वं पश्यन्ति

(B) हस्तेलीलाकमलमलके बालकुन्दानुविद्धम्

(C) बोद्धारो मत्सरग्रस्ता: प्रभव: स्मयदूषिता:

(D) हितं मनोहारि च दुर्लभं वच:

33. "किम्" प्रश्नवाचकसर्वनामपदं चतुर्थी विभक्तौ, एकवचने

(A) कस्मात्

(B) कस्य

(C) कस्मै

(D) केन

34. उत्तररामचरितस्य तृतीयाङ्कस्य नाम किम् ?

(A) सीता

(B) छाया

(C) माया

(D) प्रज्ञा

35. क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् – अत्र स्थायीभूषणं किम् ?

(A) स्वर्णाभूषणम्

(B) वाणीरूपभूषणम्

(C) धनरूपभूषणम्

(D) भौतिकसंसाधनम्

36. ''आशाबन्ध: कुसुमसदृशं प्रायशो ह्यङ्गनानां सद्य:पाति प्रणयिहृदयं विप्रयोगे रुणद्धि।।'' इतीयं सूक्तिर्विद्यते

(A) नीतिशतके

(B) अभिज्ञानशाकुन्तले

(C) उत्तररामचरिते

(D) मेघदूते

37. 'इष्टप्रवासजनितान्यबलाजनस्य दु:खानि नूनमतिमात्रसुदु:सहानि।।' इतीयं सूक्तिर्विद्यते

(A) मेघदूते

(B) अभिज्ञानशाकुन्तले

(C) उत्तररामचरिते

(D) नीतिशतके

38. उत्तररामचरितस्य तृतीयाङ्कस्याऽऽरम्भ: केन वाक्येन भवति ?

(A) तत: प्रविशति कन्याद्वयम्

(B) तत: प्रविशति मुनिद्वयम्

(C) तत: प्रविशति नदीद्वयम्

(D) तत: प्रविशति सखीद्वयम्

39. मेघदूते 'सृष्टिराद्येव धातु:' इति का कथिता ?

(A) अलकापुरी

(B) रेवा नदी

(C) उज्जयिनी

(D) यक्षप्रिया

40. भी धातो: विधिलिङि प्रथमपुरुषैकवचनस्य रूपमस्ति

(A) बिभेत्

(B) बिभियात्

(C) बिभ्यतु

(D) बिभित

41. महौजसो मानधना धनार्चिता
धनुर्भृत: संयति लब्धकीर्तय:।
इत्यत्र 'संयति' पदे किं रूपम् ?

(A) सप्तमीविभक्ति:, एकवचनम्

(B) प्रथमाविभक्ति:, एकवचनम्

(C) द्वितीयाविभक्ति:, द्विवचनम्

(D) सप्तमीविभक्ति:, बहुवचनम्

42. 'हेतौ' इति सूत्रस्योदाहरणमस्ति

(A) पुण्येन दृष्टो हरि:

(B) जटाभिस्तापस:

(C) कृष्णाय ईक्षते

(D) चौराद् विभेति

43. सुयोधनस्य कः परस्परं न बाधते ?

(A) त्रिगणः

(B) मित्रगणः

(C) शत्रुगणः

(D) भृत्यगणः

44. 'मैं पात्र से जल पीता हूँ;' इत्यस्य वाक्यस्य संस्कृतेन कर्मवाच्ये किं रूपं भवति ?

(A) पात्रेणाहं जलं पिबामि।

(B) पात्रेणाहं जलं पीयते।

(C) मया पात्रेण जलं पीयते।

(D) मया पात्रं जलं पीयते।

45. 'राजपुरुषः' इति उदाहरणमस्ति

(A) द्वन्द्वस्य

(B) बहुव्रीहेः

(C) समानाधिकरणतत्पुरुषस्य

(D) व्यधिकरणतत्पुरुषस्य

46. किरातार्जुनीयस्य सुभाषितमस्ति

(A) कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु

(B) वरं विरोधोऽपि समं महात्मभिः

(C) याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामाः

(D) तरलहृदयमप्रतिबुद्धञ्च मदयन्ति धनानि

47. राष्ट्रभक्तिभावनापूर्णं गद्यकाव्यमस्ति

(A) कादम्बरी

(B) शिवराजविजयम्

(C) मालविकाग्निमित्रम्

(D) रघुनाथचरितम्

48. पञ्चगङ्गम् इति समस्त पदे कः समासः ?

(A) द्विगु समासः

(B) अव्ययीभावः

(C) बहुव्रीहि समासः

(D) कर्मधारयः

49. मेघदूतं केन छन्दसा निबद्धमस्ति ?

(A) मन्दाक्रान्ता (B) उपजातिः

(C) मालिनी (D) प्रहर्षिणी

50. किरातार्जुनीयमिति महाकाव्यस्य स्रोतं किम् ?

(A) भागवतपुराणम्

(B) शिवपुराणम्

(C) दशरथजातकम्

(D) हितोपदेशम्

51. 'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु' इतीयं सूक्तिर्विद्यते

(A) मेघदूते

(B) उत्तररामचरिते

(C) अभिज्ञानशाकुन्तले

(D) नीतिशतके

52. 'अनुमतगमना शकुन्तला
तरुभिरियं वनवासबन्धुभिः।'

इत्यस्मिन् पद्यांशे 'अनुमतगमना' पदे कः समासः ?

(A) बहुव्रीहिः

(B) तत्पुरुषः

(C) अव्ययीभावः

(D) द्वन्द्वः

53. 'याच्ञा मोघा वरमधिगुणे नाधमेलब्धकामा' इत्यस्मिन् श्लोकांशे 'अधिगुणे' इति पदे समासोऽस्ति

(A) अव्ययीभाव: (B) बहुव्रीहि:

(C) तत्पुरुष: (D) कर्मधारय:

54. शिवराजविजयो यथा मङ्गलसूक्त्या आरम्भ्यते सा कुत: समुद्धृता ?

(A) विष्णुपुराणात्

(B) श्रीमद्भगवद्गीताया:

(C) श्रीदुर्गासप्तशत्या:

(D) भागवतमहापुराणात्

55. किरातार्जुनीये महाकाव्ये कियन्त: सर्गा: ?

(A) 21 (B) 19

(C) 18 (D) 22

56. 'दा' धातो: लङ्लकारस्य प्रथमपुरुषस्य बहुवचने किं रूपं भवति ?

(A) अददाम् (B) अददु:

(C) दद्यु: (D) अदु:

57. सन्धिं करोतु – स्व + ईरिणी

(A) स्वेरिणी

(B) स्वैरिणी

(C) स्वीरिणी

(D) स्वारिणी

58. 'वनेचर:' इत्यत्र क: समास: ?

(A) अव्ययीभाव: (B) अलुक्

(C) तत्पुरुष: (D) कर्मधारय:

59. 'हरेऽव' इत्यत्र सन्धिकारकं सूत्रमस्ति

(A) एङ: पदान्तादति

(B) अवङ् स्फोटायनस्य

(C) वान्तो यि प्रत्यये

(D) एचोऽयवायाव:

60. न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिण: अस्य सुभाषितस्य रचनाकार: क: ?

(A) माघ: (B) भारवि:

(C) श्रीहर्ष: (D) भास:

61. 'सर्व' इति शब्दस्य स्त्रीलिङ्गे चतुर्थी विभक्तौ एकवचने रूपं भविष्यति

(A) सर्वस्मै (B) सर्वाया:

(C) सर्वस्यै (D) सर्वाय

62. लक्ष्मीं प्रति किमकथयत् ?

(A) सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति

(B) वरं पर्वतदुर्गेषु भ्रान्तं वनचरै: सह

(C) संतप्तानां त्वमसि शरणम्

(D) जातं वंशे भुवनविदिते

63. "द्वावेव" पदस्य सन्धि विच्छेदं कुरु

(A) द्वा + एव (B) द्वे + एव

(C) द्वौ + एव (D) द्वि + एव

64. "अन्त:करणतत्त्वस्य दम्पत्यो: स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते।।"
इतीयमुक्तिरस्ति

(A) मुरलाया: (B) तमसाया:

(C) सीताया: (D) लोपामुद्राया:

65. मनुष्याणां देहस्थ: शत्रु: क: ?
(नीतिशतकानुसारम्)
(A) निद्रा
(B) आलस्यम्
(C) बुभुक्षा
(D) पिपासा

66. 'विवेकभ्रष्टानां भवति विनिपात: शतमुख:' इतीयं सूक्तिर्विद्यते
(A) किरातार्जुनीये
(B) नीतिशतके
(C) मेघदूते
(D) कादम्बर्यां शुकनासोपदेशे

67. 'शाकपार्थिव:' इति पदे समासोऽस्ति
(A) मध्यमपदलोपी तत्पुरुष:
(B) मयूरव्यंसकादितत्पुरुष:
(C) उपपदतत्पुरुष:
(D) अलुक्तत्पुरुष:

68. वारिशब्दस्य सप्तमी विभक्ते: रूपं नास्ति
(A) वारिणि
(B) वारिणो:
(C) वारिषु
(D) वारिसु

69. सन्धिं करोतु – पितृ + नाम्
(A) पितृनाम्
(B) पितृणाम्
(C) पित्रानाम्
(D) पितॄणाम्

70. इयं सूक्ति: कुत्र प्राप्यते ?
'अर्थो हि कन्या परकीय एव'
(A) उत्तररामचरिते
(B) नीतिशतके
(C) शुकनासोपदेशे
(D) अभिज्ञानशाकुन्तले

71. श्रिय: प्रदुग्धे विपदो रुणद्धि
यशांसि सूते मलिनं प्रमार्ष्टि।
संस्कारशौचेन परं पुनीते
शुद्धा हि बुद्धि: किल कामधेनु:।।
अस्मिन् श्लोके कर्तृपदं किम् ?
(A) श्रिय:
(B) यशांसि
(C) शुद्धा बुद्धि:
(D) कामधेनु:

72. भूतबलि: समस्त पदे य: समास:
(A) तृतीया तत्पुरुष:
(B) द्वितीया तत्पुरुष:
(C) पञ्चमी तत्पुरुष:
(D) चतुर्थी तत्पुरुष:

73. यक्ष: रामगिर्याश्रमेषु किं चक्रे ?
(A) प्रणतिम्
(B) प्रीतिम्
(C) वसतिम्
(D) प्रतीतिम्

74. ब्रह्मणा आत्माधीनं एकान्तगुणं योऽस्ति अपण्डितानाम्
(A) मौनावलम्बनम्
(B) वाचालागुणम्
(C) परिभ्रमणम्
(D) दुर्व्यसनम्

75. शुकनासो यमुपदिष्टवान्, स उपदेशानन्तरं कुत्र जगाम ?
(A) मातुरन्तिकम् (B) पितुरन्तिकम्
(C) स्वभवनम् (D) स्वोपवनम्

76. अधोलिखिता सूक्तिः कुत्र विद्यते ?
'हितं मनोहारि च दुर्लभं वचः।'
(A) मेघदूते
(B) शुकनासोपदेशे
(C) उत्तररामचरिते
(D) किरातार्जुनीये

77. 'कुलटा' इत्यत्र केन नियमेन सन्धिर्जातः ?
(A) अकः सवर्णे दीर्घः
(B) आद् गुणः
(C) शकन्ध्वादिषु पररूपं वाच्यम्
(D) एङः पदान्तादति

78. दुर्योधनः दण्डेन कं निहन्ति ?
(A) उपद्रवम्
(B) अर्थबाधाम्
(C) धर्मविप्लवम्
(D) दण्डपारुष्यम्

79. 'अपरिणामोपशमो दारुणो लक्ष्मीमदः' इतीयं सूक्तिर्विद्यते
(A) अभिज्ञानशाकुन्तले
(B) उत्तररामचरिते
(C) कादम्बर्यां शुकनासोपदेशे
(D) नलचम्पूकाव्ये

80. नीतिशतकानुसारं, मूर्खाणाम् आभूषणं किम् ?
(A) हारः
(B) वाचालत्वम्
(C) मौनम्
(D) करस्थं पुस्तकम्

81. क्रियासु युक्तैर्नृप ! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः श्लोकेऽस्मिन् "चारचक्षुषः" कोऽस्ति ?
(A) केसरीनन्दनः (B) मेघः
(C) वनेचरः (D) युधिष्ठिरः

82. 'गम्' इति धातोर्लट्लकारे मध्यमपुरुषस्य द्विवचने रूपं भवति
(A) गच्छतः (B) गच्छथ
(C) गच्छथः (D) गच्छावः

83. गुणसन्धेरुदाहरणमस्ति
(A) अक्षौहिणी
(B) स्वैरिणी
(C) प्रौढः
(D) उपेन्द्रः

84. भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः श्लोकोऽयं कुत्रास्ति ?
(A) अभिज्ञानशाकुन्तले 4/22
(B) अभिज्ञानशाकुन्तले 4/18
(C) अभिज्ञानशाकुन्तले 4/6
(D) अभिज्ञानशाकुन्तले 4/9

85. 'आद्ये वः कुसुमप्रसूतिसमये' इत्यत्र 'वः' इति पदे विभक्तिरस्ति
(A) प्रथमा
(B) द्वितीया
(C) तृतीया
(D) षष्ठी

86. अर्थो हि कन्या परकीय एव – इत्यस्मिन् श्लोके छन्दः
(A) इन्द्रवज्रा (B) उपजाति
(C) आर्याजाति (D) वंशस्थ

87. दा धातोः लटि प्रथमपुरुषस्य बहुवचने रूपमस्ति
(A) ददति
(B) ददासि
(C) दत्थः
(D) दत्थ

88. कः 'पयःपूरपूरितान्यकूपारतलानि' मरुकरोति ?
(A) योगिराजः
(B) भगवान् कालः
(C) शिववीरः
(D) महमूद गजनी

89. 'निन्दन्तु निपुणाः' इत्यत्र 'नीतिनिपुणाः' इति पदे समासोऽस्ति
(A) तत्पुरुषः (B) कर्मधारयः
(C) बहुव्रीहिः (D) द्विगुः

90. संख्यायाः कृते संस्कृते कः शब्दः प्रयुज्यते ?
(A) ऊननवति
(B) नवाशीति
(C) षण्णवति
(D) नवनवति

91. 'हरये' इत्यत्र सन्धिप्रयोजकं सूत्रमस्ति
(A) इको यणचि
(B) एचोऽयवायावः
(C) लोपः शाकल्यस्य
(D) एङः पदान्तादति

92. मूलश्लोकस्य उचितं शब्दं (पदं) रिक्तस्थाने प्रपूरयतु – 'रिक्तः सर्वो भवति हि ________ पूर्णता गौरवाय ।।'
(A) विभुः
(B) लघुः
(C) प्रभुः
(D) शिशुः

93. 79 इत्यस्याः संख्यायाः कृते कः शब्दः प्रयुज्यते ?
(A) नवसप्तति
(B) नवाशीति
(C) नवनवति
(D) एकान्नसप्तति

94. यस्मिन् श्लोके वस्तुनिर्देशात्मकं मंगलाचरणमस्ति
(A) श्रिय: कुरुणामधिपस्य पालनीं प्रजासु
(B) या सृष्टि: स्रष्टुराद्या वहति विधिहुतं
(C) दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये
(D) तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्त:

95. अभिज्ञानशाकुन्तलस्य नायक: कीदृश: ?
(A) धीरललित:
(B) धीरोदात्त:
(C) धीरोद्धत:
(D) धीरप्रशान्त:

96. प्रासादात् बालक: पततीति वाक्यं बहुवचने लिख
(A) प्रासादेन बालक: पतति
(B) प्रासादात् बालका: पतन्ति
(C) प्रासादात् बालक: पतन्ति
(D) प्रासादेन बालका: पतन्ति

97. धनस्य महत्तां कस्मिन् वाक्येऽकथयत् ?
(A) सर्वे गुणा: काञ्चनमाश्रयन्ति
(B) अर्थो हि कन्या परकीय एव
(C) विवेकभ्रष्टानां भवति विनिपात: शतमुख:
(D) न हि गणयति क्षुद्रो जन्तु: परिग्रहफल्गुताम्

98. 'पुटपाकप्रतीकाशो रामस्य करुणो रस:' इतीयमुक्तिरस्ति उत्तररामचरिते
(A) मुरलाया:
(B) तमसाया:
(C) गोदावर्या:
(D) सीताया:

99. 'न खलु धीमतां कश्चिदविषयो नाम'; कस्येयमुक्ति: ?
(A) शारद्वतस्य
(B) शार्ङ्गरवस्य
(C) प्रियम्वदाया:
(D) गौतम्या:

100. 'पारेगङ्गम्' इत्यत्र समासोऽस्ति
(A) अव्ययीभाव:
(B) तत्पुरुष:
(C) बहुव्रीहि:
(D) द्विगु:

101. भू धातो: लट्–मध्यमपुरुष–द्विवचनस्य रूपमस्ति
(A) भवतम्
(B) भवेतम्
(C) अभवतम्
(D) भवथ:

102. 'अहो दुरन्ता बलवद्विरोधिता' इतीयमुक्तिरस्ति
(A) वनेचरस्य
(B) युधिष्ठिरस्य
(C) द्रौपद्या:
(D) भीमसेनस्य

103. 'अस्मद्' शब्दस्य 'नौ' इत्येतद् रूपं कुत्र भवति ?
(A) द्वितीयाविभक्तौ द्विवचने, बहुवचने च
(B) चतुर्थीविभक्तौ द्विवचने, बहुवचने च
(C) द्वितीयाचतुर्थीषष्ठीविभक्तिषु द्विवचने
(D) षष्ठीविभक्तौ बहुवचने

104. स्त्रीलिङ्गस्य किं शब्दस्य रूपं नास्ति ?
(A) कान्
(B) कया
(C) कयो:
(D) कासाम्

105. शिवस्य राशीभूत इव अट्टहास: क: ?
(A) स्वर्ग:
(B) विन्ध्य:
(C) कैलास:
(D) मेरु:

106. 'आ: अतिथिपरिभाविनि' - अस्य कथनस्य कथनकार:
(A) महर्षि विश्वामित्र:
(B) महर्षि मारीच:
(C) महर्षि कण्व:
(D) महर्षि दुर्वासा

107. ब्रू धातो: लटि प्रथमपुरुषस्य रूपं नास्ति
(A) ब्रवीति
(B) आह
(C) आहु:
(D) आत्थ

108. पतिशब्द: प्रथमा विभक्तौ, द्विवचने
(A) पति:
(B) पत्या
(C) पत्ये
(D) पती

109. अलुक्तत्पुरुषस्य उदाहरणमस्ति
(A) परस्मैपदम्
(B) अलंकृत्य
(C) सत्कृत्य
(D) ऊरीकृत्य

110. नदी: इति पदे का विभक्ति: ?
(A) द्वितीया
(B) तृतीया
(C) पञ्चमी
(D) षष्ठी

111. 'दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधन:' इति श्लोकांशस्य दुरोदरशब्दस्यार्थोऽस्ति
(A) लम्बोदर:
(B) द्यूतकार:
(C) युधिष्ठिर:
(D) द्यूतम्

112. 'सन्तप्तानां त्वमसि शरणम् ' - अत्र सन्तप्तानां रक्षक:
(A) भोलेनाथ:
(B) कुबेर:
(C) मेघ:
(D) यक्ष:

113. 'राजराज' इति शब्दस्य कोऽर्थ: ?
(A) इन्द्र:
(B) कुबेर:
(C) शिव:
(D) विष्णु:

114. सख्यु: पदे विभक्ति: वचनं च
(A) पञ्चमी, एकवचनम्
(B) पञ्चमी, द्विवचनम्
(C) चतुर्थी, एकवचनम्
(D) चतुर्थी, बहुवचनम्

115. पठ्धातो: लोटि प्रथमपुरुषैकवचनस्य रूपमस्ति
(A) पठेत्
(B) पठतात्
(C) अपठत्
(D) पठति

116. 'येषां न विद्या न तपो न दानं .... मनुष्यरूपेण मृगाश्चरन्ति' ।। - अस्मिन् श्लोके 'मृगा:' इति पदस्यार्थोऽस्ति
(A) हरिणा:
(B) पशव:
(C) गर्दभा:
(D) वृषभा:

117. संस्कृत व्याकरणे (पाणिनिमनुसृत्य) प्रत्याहाराणां संख्या कियती ?

(A) 54 (B) 45

(C) 43 (D) 39

118. उत्तमजना: किं न परित्यजन्ति ?

(भर्तृहरिमतानुसारम् )

(A) अध्ययनम्

(B) धनार्जनम्

(C) प्रारब्धं कार्यम्

(D) देवार्चनम्

119. किरातार्जुनीयस्य कथावस्तुनः मूलस्रोतः किम् ?

(A) महाभारतम् (B) रामायणम्

(C) वायुपुराणम् (D) अग्निपुराणम्

120. 'अतिनिद्रम्' इत्यस्मिन् समासे अति अव्ययं कस्मिन् अर्थे प्रयुक्तमस्ति ?

(A) विभक्त्यर्थे

(B) शब्दप्रादुर्भावार्थे

(C) असम्प्रति-अर्थे

(D) यौगपद्य-अर्थे

121. कोऽस्ति प्रधानो रसः शिवराजविजयस्य ?

(A) करुणः (B) वीरः

(C) शृङ्गारः (D) रौद्रः

122. अपादानसंज्ञायाः विधानं न करोति सूत्रम्

(A) ध्रुवमपायेऽपादानम्

(B) स्पृहेरीप्सितः

(C) भुवःप्रभवश्च

(D) वारणार्थानामीप्सितः

123. करणसंज्ञा भवति

(A) कर्तुरीप्सिततमस्य

(B) साधकतमस्य

(C) क्रियया अभिप्रेतस्य

(D) अधिकरणस्य

124. मृतयवनस्य कञ्चुकात् किं प्राप्तम् ?

(A) पत्रम्

(B) रत्नम्

(C) छुरिका

(D) मानचित्रम्

125. 'अन्तर्हिते शशिनि सैव कुमुद्वती में दृष्टिं न नन्दयति संस्मरणीयशोभा'।

इत्यत्र 'अन्तर्हिते शशिनि' इत्यनयोः पदयोः केन सूत्रेण सप्तमीविभक्तिर्भवति ?

(A) यतश्च निर्धारणम्

(B) यस्य च भावेन भावलक्षणम्

(C) निमित्तात् कर्मयोगे

(D) सप्तमीपञ्चम्यौ कारकमध्ये

3. प्रश्न–पुस्तिका में किसी विसंगति के अतिरिक्त, किसी भी स्थिति में अभ्यर्थी को कोई दूसरी प्रश्न–पुस्तिका नहीं दी जाएगी । अभ्यर्थी को प्रश्न–पुस्तिका को उपयोग में लाने और OMR उत्तर–पत्रक को पूरित करने में सावधानी बरतनी चाहिए ।

4. अभ्यर्थी को 125 प्रश्नों के उत्तर भरने हैं । सभी प्रश्न अनिवार्य हैं । गलत उत्तर के लिए नकारात्मक अंक नहीं दिये जायेंगे ।

5. OMR उत्तर–पत्रक को भरने के पूर्व अभ्यर्थी उत्तर–पत्रक पर मुद्रित महत्वपूर्ण निर्देशों को ध्यानपूर्वक पढ़ें ।

6. अभ्यर्थी को दिए गए चार विकल्पों में से एक सबसे अधिक उपयुक्त विकल्प का चयन कर OMR उत्तर–पत्रक में दिए गए निर्देशानुसार भरना है ।

7. किसी भी परिस्थिति में प्रश्न–पुस्तिका का कोई भी कागज अलग नहीं करना है ।

8. अभ्यर्थी परीक्षा भवन में **प्रवेश पत्र** के अतिरिक्त सादा या लिखा कोई अन्य कागज नहीं लाएँगे । यदि कोई अभ्यर्थी कोई अतिरिक्त कागज, नोट, पुस्तक, कैलकुलेटर, स्लाइड रूल, मोबाइल फोन आदि अपने साथ परीक्षा भवन में रखे पाया जाता है, तो उसे अनुचित साधन प्रयोग के अन्तर्गत दण्डित किया जा सकता है ।

9. सभी रफ कार्य को केवल प्रश्न–पुस्तिका के अन्दर ही करना है ।

10. केवल काला बॉल पेन उत्तर भरने के लिए प्रयोग करें ।

3. No second question booklet shall be given to any candidate under any circumstances except any discrepancy in question booklet. The candidate should be careful in handling the question booklet and filling the OMR answer sheet.

4. A candidate has to attempt 125 questions. All the questions are compulsory. There is no negative marking for wrong answer.

5. Before filling the OMR answer sheet, the candidate should read carefully the important instructions given on answer sheet.

6. The candidate has to choose best suitable alternative out of the four alternatives given and mark on the OMR answer sheet according to the instructions given in the answer sheet.

7. In no case any paper from the question booklet should be separated.

8. The candidate shall not bring any loose paper, whether written or blank, except the **admit card**, inside the examination hall. If any candidate is found having any loose paper, notes, books, calculator, slide rule, mobile phone etc. with him/her in the examination hall, he/she will be liable to be punished for use of unfair means..

9. All rough work should be done inside the question booklet only.

10. Only use **black** ball pen for filling answers.